केन्द्रीय –विद्यालय –संगठनम् ,लखनऊ संभागः

सत्रान्त –परीक्षा प्रश्नपत्रम् (**2023-2024)**

कक्षा –सप्तमी **( 7 )** अवधिः – सार्धहोराद्वयम् **(2:30)**

विषयः –संस्कृतम् पूर्णांका**:** – षष्टिः**(60)**

निर्देशाः –

- सर्वे प्रश्नाः अनिवार्याः सन्ति ।
- सर्वेषां प्रश्नानाम् उत्तराणि प्रश्नक्रमानुसारं लेखनीयानि ।
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति । तद्यथा –

क –खण्डः अपठित –अवबोधनम् - 10 अंकाः

ख.- खण्डः रचनात्मक – लेखनम् - 10 अंकाः

ग- खण्डः अनुप्रयुक्त –व्याकरणम् - 15 अंकाः

घ.-खण्डः पठित –अवबोधनम् - 25 अंकाः

---

## क –खण्डः अपठित –अवबोधनम् - **10** अंकाः

प्रश्न क्र.**1-**अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत **-**

राहुलः जंतुशालाम् गच्छति। सः जनकेन सह गच्छति। तत्र सः सिंहम् पश्यति। सिंहः उच्चैः गर्जति। ततः सः मयूरं पश्यति। मयूरः उपवने शोभनं नृत्यति। सः वृक्षे वानरं दृष्ट्वां भयभीतः अस्ति। वानरः कदलीफलं खादति। एकः अन्यः वानरः अपि तत्र कूर्दति। जंतुशालायाम् अनेके मृगाः सन्ति। राहुलः सर्वान् मृगान् पश्यति प्रसन्नः च भवति। ततः सः गृहम् आगच्छति।

**I.** एकपदेन उत्तरत**-** **1x4=4**

(क) राहुलः कुत्र गच्छति? …………………………..

(ख) स: केन सह गच्छति? …………………………..

(ग) क: उच्चैः गर्जति? …………………………..

(घ) वानरः किम् खादति? …………………………..

**II.** पूर्णवाक्येन उत्तरत**-** **2x2=4**

(क) मयूरः किं करोति?

……………………………………………………………………………………………………..

(ख) राहुलः कदा भयभीतः अस्ति?

……………………………………………………………………………………………………..

**III.**यथानिर्देशम् उतरत**-** **1x2=2**

(क ) “ जंतुशालायाम् अनेके मृगाः सन्ति “ अत्र क्रियापदम् किम् अस्ति ? …………………………..

1. जंतुशालायाम् 2. मृगाः 3. सन्ति

(ख). सः जनकेन सह गच्छति अत्र “जनकेन” पदे का विभक्ति अस्ति? …………………………..

1. प्रथमा 2. द्वितीया 3. तृतीया

## ख.- खण्डः रचनात्मक – लेखनम् - **10** अंकाः

प्रश्न क्र.**2** चित्रं दृष्ट्वा उपयुक्तपदानि गृहीत्वा वाक्यरचनां कुरुत**–** **1x5=5**

**(बालका: ,उदेति ,पुष्पाणि, कन्दुकेन, सूर्य:,कमलानि,खगा: ,क्रीडन्ति ,डयन्ते चित्रपतङ्गा:,विकसन्ति, कूजन्ति )**



प्रश्न क्र.**3** कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत- **1x5=5**

(क) .................. बालिका मधुरं गायति। (एकम्, एका, एकः)

(ख) .................. कृषकाः कृषिकर्माणि कुर्वन्ति। (चत्वारः, चतस्रः, चत्वारि)

(ग) ..................पत्राणि सुन्दराणि सन्ति। (ते, ताः, तानि)

(घ) धेनवः दुग्धं .................. । (ददाति, ददति, ददन्ति)

(ङ) वयं संस्कृतम् .................. । (अपठम्, अपठन्, अपठाम)

ग- खण्डः अनुप्रयुक्त –व्याकरणम् - **15** अंकाः

## प्रश्न क्र.4 अङ्कानां कृते पदानि लिखतु **1x4=4**

क 28 ...........................

ख 27 ...........................

ग 30 ...........................

घ 31 ...........................

प्रश्न क्र.**5** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- **1x4=4**

(क) सलिले <u>नौका</u> सेलति। ...........................................................................

(ख) <u>पुष्पेषु</u> चित्रपतङ्गाः डयन्ते। ...........................................................................

(ग) <u>उष्ट्रः</u> पृष्ठे भारं वहति। ...........................................................................

(घ) <u>धावनसमये</u> अश्वः किमपि न खादति।...........................................................................

## प्रश्न क्र.6 अधोलिखित पदेषु धातवः के सन्ति **1x4=4**

पदम् धातुः

करोति ............

पश्य .............

भवेत् ..............

तिष्ठति ...............

प्रश्न क्र.**7** मञ्जूषातः विलोमपदानि चित्वा लिखत **½ x6=3**

(अधुना, मित्रतायाः, लघुचेतसाम्, गृहीत्वा, दुःखिनः, दानवाः )

1. शत्रुतायाः - .........................
2. पुरा - .........................
3. मानवाः - .........................
4. उदारचरितानाम् - .........................
5. सुखिनः - .........................
6. अपहाय - .........................

## घ.-खण्डः पठित –अवबोधनम् - **25** अंकाः

प्रश्न क्र.**8** अधोप्रदत्तं श्लोकद्वयं पठित्वा प्रश्नान् उत्तरत-

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।**1**।।
मित्रेण कलहं कृत्वा न कदापि सुखी जनः ।
इति ज्ञात्वा प्रयासेन तदेव परिवर्जयेत् ।।**2**।।

एकपदेन उत्तरत –

1. महान् रिपुः क: अस्ति ? ........................................ (1x2=2)

2. बन्धु: क: अस्ति ? ........................................

पूर्णवाक्येन उत्तरत – (1x1=1)

3. क: जन: सुखी न भवति ?

........................................................................................................................................

निर्देशानुसारम् उत्तरत – (1/2x2=1)

4. "महान् रिपुः अस्ति" अत्र विशेषणपदम् किम् अस्ति ? ? ……………………………

(क) महान् (ख) रिपुः (ग) अस्ति

5." नास्त्युद्यमसमो बन्धुः " अत्र क्रियापदम् किम् अस्ति ? ……………………………

(क) ना (ख) अस्ति (ग) उद्यम:

प्रश्न क्र.**9** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत **-**

विश्वस्य उपलब्धासु भाषासु संस्कृतभाषा प्राचीनतमा भाषास्ति। भाषेयं अनेकाषां भाषाणां जननी मता। प्राचीनयोः ज्ञानविज्ञानयोः निधिः अस्यां सुरक्षितः। संस्कृतस्य महत्त्वविषये केनापि कथितम् - 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'।

इयं भाषा अतीव वैज्ञानिकी। केचन कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदासादीनां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। कौटिल्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभटः अकरोत्।

एकपदेन उत्तरत –

1. प्राचीनतमा भाषा का अस्ति। ? …………………………… (1x2=2)

2. किम् जगति प्रसिद्धमस्ति ? ……………………………

पूर्णवाक्येन उत्तरत – (1x1=1)

3. संस्कृत भाषाया: वाङ्मयं कै: समृद्धमस्ति ?

……………………………………………………………………………………………………

निर्देशानुसारम् उत्तरत – (1/2x2=1)

4. कस्मिन् पदे षष्ठी विभक्ति नास्ति ? ……………………………………

(क) भाषाणां (ख) भारतस्य (ग) वेदैः

5. शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभटः अकरोत् अत्र कर्तृपदम् किम् अस्ति? ………………

(क) शून्यस्य (ख) आर्यभटः (ग) अकरोत्

प्रश्न क्र.**10** अधः प्रदत्तं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

शुचिः - अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

सलीमः - रुचे! अयं त्रिवर्णः कथम्?

रुचिः - अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि?

सलीमः - अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः।

देवेशः - अस्माकं ध्वजे एते त्रय: वर्णाः किं सूचयन्ति?

सलीमः - शृणु, केशरवर्णः शौर्यस्य, श्वेत: सत्यस्य, हरितश्च समृद्धेः सूचकाः सन्ति।

एकपदेन उत्तरत –

1. अस्माकं देशस्य ध्वजः कीदृश: अस्ति ? …………………………… (1x2=2)

2. हरित: वर्ण: कस्य सूचक: अस्ति ?

पूर्णवाक्येन उत्तरत – (1x1=1)

3. त्रिवर्णध्वजे त्रयः के के वर्णाः सन्ति ?

……………………………………………………………………………………………………………………

निर्देशानुसारम् उत्तरत – (1/2x2=1)

4. "त्वम् एतेषां वर्णानां नामानि जानासि" अत्र क्रियापदम् किम् अस्ति? ……………………………

(क) त्वम् (ख) जानासि (ग) नामानि

5. केशरवर्णः ……………………सूचक: अस्ति ? ……………………………

(क) सत्यस्य (ख) समृद्धेः (ग) शौर्यस्य

प्रश्न क्र.**11** विशेषणपदैः सह विशेष्यपदानि योजयत**-** **½ x6=3**

**(**बालिकानाम् , विद्यालयम् , बालकानाम् , अधिकारः, अल्पवयस्का , विद्यालये **)**

1. सर्वेषाम् - ……………………

2. मौलिकः ……………………

3. एषा ……………………

4. सर्वकारीयम् ……………………

5. समीपस्थे ……………………

6. सर्वासाम् ……………………

प्रश्न क्र.**12** मञ्जूषातः समानार्थकपदानि चित्वा लिखत **½ x6=3**

(परस्य ,आत्मानम् ,बाधितः ,परिवारः, सम्पन्नम्, त्यक्त्वा )

1. स्वकीयम् ---------

2. अवरुद्धः ---------

3. कुटुम्बकम् --------

4. अन्यस्य -------

5. अपहाय -------

6. समृद्धम् -------

प्रश्न क्र.**13** मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत **½ x6=3**

(करिष्यामि , गमिष्यति ,अनयत्, पतिष्यति ,स्फोटयिष्यति ,त्रोटयति )

(क) काष्ठकूटः चञ्च्वा गजस्य नयने … …. ।

(ख) मार्गे स्थितः अहमपि शब्दं ….. ….. ।

(ग) तृषार्तः गजः जलाशयं ………………. |

(घ) गजः गर्ते ……. ।

(ङ) काष्ठकूटः तां मक्षिकायाः समीपं . ……….. |

(च) गजः शुण्डेन वृक्षशाखा: .................. |

प्रश्न क्र.**14** श्लोकांशान् योजयत **1x4=4**

| | |
|---|---|
| धनधान्यंप्रयोगेषु | नासद्भिःकिन्चिदचरेत |
| विस्मयो न हि कर्तव्यः | त्यक्तलज्जःसुखी भवेत् |
| सत्येन धार्यते पृथिवी | बहु रत्ना वसुन्धरा |
| सद्भिर्विवादं मैत्रीं च | विद्यायाः संग्रहेषु च |
| आहरे व्यवहारे च | सत्येन तपते रविः |